Sloka 6.—When Venus is in Mesha and his Dasa is in progress, the person concerned will enjoy happiness through women. He will suffer loss of honor. He will be roaming about and will not be capable of endurance. He will lead a low and humble life. He will be of a lordly disposition. He will become the favourite of a princess.

वृषभे शुक्रदशायां कृषिपशुदारान्वितो मतिमान् ।
बहुशास्त्रवित्सुदान्तः कन्याजनको नरेन्द्रदयितश्च ॥ ७ ॥

Slokv 7.—If Venus be in Vrishabha and his Dasa sets in, the person concerned will be engaged in agriculture, will possess wife, and cattle and be intelligent. He will know many sciences, will be a Buddhist, father of daughters, and a favourite of the King.

मिथुने शुक्रदशायामनेककार्यान्वितो महोत्साही ।
विस्मयकथाभिलाषी विदेशनिरतोऽर्थवान् भवति ॥ ८ ॥

Sloka 8.—When Venus occupies Mithuna and his Dasa is in progress, the native will be engaged in many activities and will be very energetic. He will be fond of amazing anecdotes. He will be in foreign places and will be wealthy.

चन्द्रगृहस्थस्य भृगोर्दशा विपाके स्वकार्य उद्युक्तः ।
द्विस्त्रीभरणसुशीलो बहुप्रकारैर्हि जीवनं कुरुते ॥ ९ ॥

Sloka 9.—During the Dasa of Venus when he is in Karkataka, the person will be busy with his own duties; he will possess two wives, be of a good disposition, and he will make his living by various means.

सिंहे शुक्रदशायां प्रवरस्त्रीसंश्रयाद्धनानि स्युः ।
परवित्तरतो धीमानल्पसुतो गोगणा विनश्यन्ति ॥ १० ॥

Sloka 10.—During the Dasa of Venus when he is in Simha, there will be influx of wealth by the person's contact with a distinguished lady. He will be keen in getting other's wealth ; he will be intelligent. He will not have many children ; and any herd of cattle he might own will perish.

कन्याश्रितशुक्रदशाप्रवर्तने पूर्ववृत्तसुखहीनः ।
भग्नोत्साही चपलो विदेशवासी स्वदारसंत्यक्तः ॥ ११ ॥

Sloka 11.—When Venus occupies Kanya and his Dasa is commencing, the person will abandon his previous professson ; he will be bereft of happiness. His enthusiasm will be curbed. He will be fickle-minded, live in a foreign place being abandoned by his wife.

वर्गोत्तमभृगुजदशापाके नृपचोरतोऽर्थहानिः स्यात् ।
अस्वस्थो बलहीनो भिक्षाशनवान् सदाटनो भवति ॥ १२ ॥

Sloka 12.—During the Dasa of Venus who has attained a Vargottama Navamsa, the person will incur loss of money through the sovereign or by theft. He will not keep good health and will be weak. He will always be roaming about and obtain his food by begging.

मूलत्रिकोणसंस्थितभृगोर्दशायां विशिष्टनामयुतः ।
कृषिपशुधनधान्याद्यैः सम्पन्नो ज्ञानिनो धनाप्तिर्वा ॥ १३ ॥

Sloka 13.—When Venus is occupying his Moolatrikona Rasi and his Dasa is in progress, the person concerned will get a new title. He will command all agricultural products, cattle, wealth and corn or money from the wise.

अटनो बहुप्रलापी परकर्मरतो निमित्तकलहाढ्यः ।
बहुऋणभागी पुरुषो वृश्चिकराशौ भृगोर्दशायां च ॥ १४ ॥

Sloka 14.—When Venus occupies Vrischika and his Dasa is in progress, the person will be wandering from place to place, prattling too much, intent on other people's work, promoting quarrels on some pretext or other and he will contract many debts.

चापे शुक्रदशायां विनाशितारिः कुलाधिको मानी ।
काव्यकलास्वातिनिपुणो नृपदयितो दारपुत्रसन्तुष्टः ॥१५॥

Sloka 15.—When Venus is in Dhanus and his Dasa is commencing, the person concerned will destroy his enemies; he will become the chief of his family and be respected. He will become very proficient in Poetry and the Arts, become the favourite of the king, and happy with his wife and children.

मकरे शुक्रदशायां क्लेशसहिष्णुः सुखी रिपुनिहन्ता ।
वातश्लेष्मप्रकृतिः कुत्सितदारो विगर्हितकुटुम्बः ॥ १६ ॥

Sloka 16.—In the Dasa of Venus when he occupies Makara, the native has to endure sorrows. He will vanquish his enemies and feel happy. He will be windy and phlegmatic in temperament, possess a bad wife and his family will be a condemned one.

कुंभे शुक्रदशायामुद्वेगी रोगवानप्राज्ञश्च ।
परयुवतिगो व्रतघ्नो नीचाचारोऽल्पकर्मनिरतश्च ॥ १७ ॥

Sloka 17.—In the Dasa of Venus when he is posited in Kumbha, the person will be distressed in mind and suffer ill-health ; he will be imprudent. He will go to other females, will be irreligious, of a despicable conduct and engaged in vile pursuits.

मीने शुक्रदशायां वंशधरो ज्ञानवान्नरेन्द्रधनी ।
कृषितो धनभागी स्यात् कमनीयवपुः प्रधानतां याति ॥ १८ ॥

Sloka 18.—During the Dasa of Venus when he is occupying Meena, he will become the chief of his family, possess great wisdom and become rich through royal favour. He will get money through agriculture, possess a handsome body, and will come to prominence.

मीने वर्गोत्तमगे भृगोर्दशायां स्वमानगुणयुक्तः ।
रोगैर्निपीडितात्मा जलप्रतिष्ठादियत्नतो धर्मः ॥ १९ ॥

Sloka 19.—When Venus has attained a Vargottama Navamsa in sign Meena and his Dasa is in progress, the person concerned will possess good qualities and be respected. He will suffer diseases. He will undertake some irrigation work for the use of the public

खोच्चस्थितो भृगुसुतो व्ययकर्मगो वा
लाभेऽपि पापरहितो न तु पापदृष्टः ।
तस्याब्दपाकसमये बहुरत्नपूर्णो
धीमान् विशालनयनो निजवंशनाथः ॥ २० ॥

इति श्रीवराहमिहिरसुतश्रीपृथुयशोविरचिते होरासारे शुक्रदशाफलाध्याय
श्चतुर्दश: ॥

Sloka 20.—When Venus is in his exaltation, the 10th, 11th or the 12th house without the conjunction or aspect of malefics and when his Dasa is progressing, the person will obtain many jewels, pearls, etc. He will be endowed with a mighty intellect, broad outlook and will become the head of his family.

Thus ends the 14th Adhyaya in Horasara, a work composed by Sri Prithuyasas, the son of Sri: Varahamihira.

पंचदशोऽध्यायः

अथ शनिदशाफलम्

मन्दस्य दशां प्राप्य प्रथितो धीमाननेकशास्त्रज्ञः ।
वृन्दग्रामपुराणां नेता पितृतोऽधिको विधिज्ञश्च ॥ १ ॥

Sloka 1.—During the advent of Saturn's Dasa, one attains fame and becomes intelligent. He will study several Sastras. He will become the leader of a group, head of a village or town, attain to a greater position than that of his father. He will have studied all the rituals.

गजतुरगगोधनाद्यैः सम्पन्नो ज्ञातितो धनप्राप्तिः ।
द्विजदेवपूजितात्मा पुराणभवनाश्रितोऽल्पसन्तुष्टः ॥ २ ॥

Sloka 2.—He will have at his command elephants, horses, cows, etc. He will get money from his Dayadas. He will worship Brahmins and Gods: He will live in a house built very long before. He will be content with whatever little he gets.

निद्रालस्यश्रमवान् स्वजनद्वेष्यो जराङ्गनासक्तः ।
धर्मप्रियो विनीतो देवायतनक्रियार्चनादिरतः ॥ ३ ॥

Sloka 3.—He will be drowsy and weary, hated by his own people and addicted to old women. He will be a friend of the virtuous, humble in disposition, and engaged in works relating to Gods, temples, etc.

वातकफाद्यैः पीडा विकलाङ्गो जायते कृशाङ्गो वा ।
सामान्यमेतदुक्तं राशौ प्रत्येकमंशकैर्वक्ष्ये ॥ ४ ॥

Sloka 4.—He will suffer from windy and phlegmatic complaints, will be defective of some limb or lean in

body. The above description is only too general. I shall give below the effects in each Rasi by the Navamsas.

मन्ददशायां मेषे प्रवासनिरतोऽस्वतन्त्रवृत्तिश्च ।
पादादिचर्मरोगी मायावी भ्रातृबन्धुरहितश्च ॥ ५ ॥

Sloka 5.—When Saturn is in Mesha and his Dasa is in progress, he will be absent and working under others. He will suffer from skin-disease from head to foot. He is deceitful in nature and is bereft of brothers or other near relations.

कृषिधान्याप्तिर्नीचाङ्कष्टस्य शनेर्दशासमये ।
पतनाद्यैः क्लेशाढ्यो नीचप्रायो निरुत्साहः ॥ ६ ॥

Sloka 6.—When Saturn has left his depression and his Dasa is in progress, one gets corn and other agricultural products. He will suffer intense grief through falls, etc. He will be almost insignificant and without energy.

वृषभे सौरिदशायां विशिष्टनामान्वितोऽतिमेधावी ।
राजा राजसमो वा युद्धेषु कृतश्रमोऽतिधर्मरतः ॥ ७ ॥

Sloka 7.—If Saturn be in Vrishabha and his Dasa be in progress, the person concerned gets a good title and becomes very intelligent He will be a king or equal to a king for having rendered a great service in war and is keenly intent in doing virtuous deeds.

मिथुने क्षमाविहीनो मन्ददशायां सुतार्थभोगरतः ।
स्त्रीचोरतोऽर्थहानिः परकार्यरतो रणार्दितो मनुजः ॥ ८ ॥

Sloka 8.—During the Dasa of Saturn when he occupies sign Mithuna, the person born will be relentless. He will be with his children commanding all kinds of wealth, comfort and enjoyment. He will lose money

through women and through theft. He will be intent in attending to other's work and distressed in war.

मन्ददशायां शशिभे चिन्तायुक्तोऽस्वतन्त्रश्च ।
मातृसुतबन्धुहीनो नेत्रश्रवणादिदुर्बलो धीमान् ॥ ९ ॥

Sloka 9.—When Saturn occupies Karkataka and his Dasa is in progress, the native will feel despondent and be depending on others. He will be bereft of his mother, sons and relations; his eyes and ears will become weak, but he will be intelligent.

सिंहे सिंहांशे वा मन्ददशायामनेकरोगयुतः ।
सुतदारबन्धुकलहो गोमहिषाश्वादिवित्तवान् भवति ॥ १० ॥

Sloka 10.—When Saturn occupies the sign or Navamsa of Simha, and his Dasa is in progress, the person will suffer many ailments. Quarrels will arise with his wife, sons and relatives. He will command the comforts of possessing cows, buffaloes, horses etc, and will be wealthy.

कन्याश्रितमन्ददशा ददाति विद्याधनं श्रमोत्पत्तिम् ।
भूरुहजलप्रमाथी गुरुद्विजाचार्ययोगिनां दयितः ॥ ११ ॥

Sloka 11 —During the Dasa of Saturn when he occupies sign Kanya, the person will acquire learning, and will get money after great effort; he will not have any regard for Brahmins, nor care for any floods. He will be liked by his elders, Brahmins, preceptors and ascetics.

उच्चाश्रितमन्ददशा ज्ञानधनैश्वर्यसम्पन्नम् ।
जनयति लोके श्रुतवान् स्वभावतोऽर्थागमं सुखं लभते ॥१२॥

Sloka 12.—When Saturn is in his exaltation and his Dasa is in progress, the person concerned will be endowed with knowledge, wealth and power. He will be

regarded by people as a great learned person, and he will earn money without much exertion.

मन्दद्दशायां कीटे वधबन्धरतो वृथाटनोऽनृतवान् ।
कृपणो दयाविहीनो नीचजनानुग्रहोपजीवी स्यात् ॥ १३ ॥

Sloka 13.—When Saturn is posited in Vrischika and his Dasa sets in, the person concerned will engage himself in killing or capturing (animals). He will be wandering without any definite purpose. He will speak falsehood; he will be miserly, and merciless. He will find favour with low people and be depending on others.

चापे मन्दद्दशायां स्वस्थो नृपसंमतो नृपेन्द्रो वा ।
जीवधनादिप्राप्तिः सुतदारसमन्वितो रणोत्साही ॥ १४ ॥

Sloka 14.—During the Dasa of Saturn when he is posited in Dhanus, the person will be independent, honoured by the king himself, get live-stock, and be in the midst of his sons and wife. He will be very active and persevering.

मकरे मन्दद्दशायां बहुश्रमोत्पन्नवित्तवान् सुभगः ।
वन्ध्याजराङ्गनानां दयितो विश्वासतोऽर्थहानिः स्यात् ॥ १५ ॥

Sloka 15.—When Saturn occupies sign Makara and his Dasa is in progress, the native will do acts involving great exertion, command wealth and he will be prosperous. He will associate with barren females or old women and by thus doing lose much of his wealth.

मूलत्रिकोणसंस्थितशनेर्दशायां सुखानि सिध्यन्ति ।
स्वकुलश्रेष्ठो मतिमान् कृषिपशुधनधान्यपुत्रवान् भवति ॥१६॥

Sloka 16.—When Saturn occupies his Moolatrikona Rasi and his Dasa is in progress, the person enjoys many

comforts ; he will become the head of his family, intelligent, have success in agriculture and he will be endowed with cattle, corn, sons, etc.

मीने मन्ददशायामल्पोत्साहाद्धनानि सिध्यन्ति ।
श्रेणीग्रामपुराणामीशो वनिताहतोऽपि मोक्षार्थी ॥ १७ ॥

Sloka 17.—When Saturn occupies Meena and his Dasa is in progress, the person born is able to earn money with a small exertion. He will be the head of a row of houses in a village. Though yearning for a damsel, he still longs for final emancipation.

आयव्ययतुल्यधनो मूढदशायां शनेरसन्तोषः ।
क्षणभङ्गुरातिकीर्तिर्विविधैः क्लेशैश्च पीडितो भवति ॥ १८ ॥

Sloka 18.—In Saturn's Dasa, when Saturn is eclipsed, the person's income and expenditure will balance each other; he will not feel happy. He has a frail body ; but his fame is very wide. He will be tormented by various mental cares.

राश्यंशकफलमेवं प्रोक्तं बलवत्तरं तयोः कथितम् ।
राश्यंशकबलसाम्यं समानरूपं वदेत्प्राज्ञः ॥ १९ ॥

Sloka 19.—Thus have been declared the effects of Saturn's Dasa due to his occupation of a Rasi or an Amsa whichever is stronger. If they be equal in strength, a clever astrologer should declare effects after a suitable modification.

एवं ग्रहाणां विविधैः प्रकारैर्दशाफलान्यत्र मयेरितानि ।
ज्ञात्वा नराणां प्रकृतिं समग्रां समादिशेत्तत्र समानरूपम् ॥२०॥

इति श्रीवराहमिहिरसुत श्रीपृथुयशोविरचिते होरासारे शनिदशाफलाध्यायः
पञ्चदशः॥

Sloka 20.—Thus have been described by me in various ways the effects of the Dasas of planets. After thoroughly understanding the nature of the persons, the astrologer should foretell the events suitably.

Thus ends the 15th Adhyaya entitled "Saturn's Dasa and his effects" in the work Horasara, a work composed by Sri Prithuyasas, the son of Sri: Varahamihira.

षोडशोऽध्यायः

॥ अथ सङ्कीर्णदशाफलम् ॥

अथ सङ्कीर्णदशायां स्थानसुखार्था भवन्ति बलहीनाः ।
परगृहनिवासशीलो लोके मान्योऽतिविद्वांश्च ॥ १ ॥

Sloka 1.—In the case of a Dasa of miscellaneous nature, the position (dignity ?), happiness and wealth will only be weak and not strong. He will however adapt himself to live under the protection of others, command respect paid by people and will be highly learned.

अनुवक्रस्य दशायां स्वमानशौर्यान्वितो धनी भवति ।
शस्तगृहे शस्तांशे रिःफाष्टमवर्जिते स्वराज्याप्तिः ॥ २ ॥

Sloka 2.—During the Dasa of a planet who is retrograde, one will have honor, combined with valour and will be moneyed. In the Dasa of a planet occupying an auspicious Rasi and Navamsa and free from quincunx position one will get a kingdom.

नीचारिभवनसंस्थितवक्रदशायां कुकर्मरतः ।
बन्धुजनगार्हितात्मा विदेशनिरतोऽ स्वतन्त्रश्च ॥ ३ ॥

Sloka 3.—When a planet occupies his depression or inimical house and is also retrograde in motion, the person concerned will be engaged in doing vile acts. He will be reviled by his relations. He will dwell in a foreign place and be a servant under another.

राहोर्दशान्तरस्थग्रहयोर्मध्ये द्विवर्षमतिदुःखम् ।
बन्धुविनाशं रोगं लभते शत्रोर्दशान्तरदशायाम् ॥ ४ ॥

Sloka 4.—During one's Bhukti and another's Antara in Rahu's Dasa when Rahu is between two planets, the person will endure acute misery for a period of two years. He will lose relations, suffer disease when the Dasa and Antara Dasa of two inimical planets are operating.

राहुयुतग्रहपाकः शुभदोऽप्यशुभेन तुल्यफलपाकः ।
पाकस्यान्ते व्याधिं दुःखं वा भ्रंशमावहति ॥ ५ ॥

Sloka 5.—The Dasa of a planet conjoined with Rahu though otherwise auspicious will yield quite inauspicious results. At the close of the period, there will be disease, misery or a fall in one's position.

होराजन्माधिपयोः शत्रुदशायां परिभ्रमं लभते ।
राज्यच्युतो विपक्षैरभिभूतोऽरिं समाश्रयति ॥ ६ ॥

Sloka 6.—During the Dasa of a planet that is inimical to the lords of the Lagna and the sign occupied by the Moon, one will be rambling about, suffer degradation from his place and insult from his enemy by seeking refuge under him.

नीचारिषष्ठव्ययसंश्रिता हि शुभाः प्रयच्छन्त्यशुभानि सर्वे ।
शुभेतरे तेषु गताः प्रयच्छन्त्यनेकदुःखानि दशासु तेषाम् ॥७॥

Sloka 7.—Planets that are in depression or inimical Rasis or are placed in the 6th and 12th houses, though

otherwise auspicious, prove inauspicious during their Dasas. Planets occupying untoward houses produce various miseries during their Dasa periods

रोगं ददाति भृगुजः स्वगृहेऽष्टमस्थः
पापान्वितो मरणकृत् स्वदशावसाने ।
लग्नेश्वरोऽष्टमगतोऽप्यशुभेन सार्द्धं
तस्यान्तरान्तरदशा मरणं करोति ॥ ८ ॥

Sloka 8.—When Venus occupies his own Rasi synchronous with the 8th house, he brings on disease to the native ; and should he be also conjoined with a malefic, causes death at the close of the Dasa. If he be the lord of the Lagna and occupy the 8th house, and that too in conjunction with a malefic, his Dasa or Antardasa will bring about the death of the native.

निधनाधिपतेः केन्द्रे स्थितस्य शुभदा दशा यदाऽस्तमितः ।
केन्द्रे राहुयुतो वा स तस्य काले मृतिं वदेत् प्राज्ञः ॥ ९ ॥

Sloka 9.—When the lord of the 8th house occupies a Kendra, his Dasa period will, if he should be eclipsed or conjoined with Rahu, bring about the death of the native.

निधनाधिपतेः केन्द्रे संस्थितस्य शुभा दशा ।
स एवार्कगतः केन्द्रे सराहुश्चेन्मृतिर्भवेत् ॥

The above is another reading.

लग्नेश्वरोऽष्टमस्थो वा यदि तस्य दशान्तरे ।
प्राणसन्देहमाप्नोति दशान्ते जीवितं त्यजेत् ॥ १० ॥

Sloka 10.—If the lord of the Lagna or the planet in the 8th house prove dangerous to the life of the native, he will die at the close of the Dasa.

क्षेत्रोच्चसंस्थिता यस्य ये ग्रहाः केन्द्रलाभगाः ।
कारकाख्यग्रहा ज्ञेयाः खमध्यस्थो विशेषतः ॥ ११ ॥

Sloka 11.—Planets occupying their own signs, their exaltation signs, if they should also be in a Kendra or the 11th house with respect to any planet, they become Karakas of the planet. That planet which occupies the 10th house of the said planet becomes a special agent.

कर्मेशः केन्द्रगो वाऽपि कश्चित्कारकसंज्ञितः ।
कर्मभाग्याधिपौ केन्द्रे स्थितौ यस्य शुभप्रदौ ॥१२॥

Sloka 12.—Or, if any planet owning the 10th house occupy a Kendra position, he becomes the Karaka of the original planet. If the lords of the 10th and 9th houses occupy Kendra positions, they become Karakas and do good.

कारकग्रहयुक्तौ चेत् स्वकुलश्रेष्ठतां व्रजेत् ।
तद्दशायां न सन्देहः स्वाभीष्टफलमाप्नुयात् ॥ १३ ॥

Sloka 13.—If there be two such Karakagrahas in any nativity, the person concerned will become an important member in the family. In the Dasa of such a planet, the person will surely have all his ambitions fulfilled.

चन्द्राधिष्ठितराशेर्नाथो लग्नाधिपोऽथवा यस्य ।
केन्द्रगतः स सुरेड्यो वयसो मध्ये सुखं तस्य ॥ १४ ॥

Sloka 14.—If the lord of the sign occupied by the Moon or of the Lagna occupy a Kendra along with Jupiter, the native will enjoy happiness in the middle portion of the planet's Dasa.

पापग्रहांशकदशा बाल्ये ज्ञानक्रियासु विघ्नकरी ।
मूढग्रहांशकदशा तथैव वाच्या न सन्देहः ॥ १५ ॥

Sloka 15.—In the Dasa of a planet occupying a Navamsa of a malefic planet, obstacles for the native's learning will arise in one's boyhood. The same remark undoubtedly apply during his Dasa period, if the planet occupy a Navamsa of an eclipsed planet.

स्वोच्चस्वक्षेत्रगतैर्बलिभिः केन्द्राश्रितैः कुजाद्यैश्च ।
रुचको भद्रो हंसो मालव्यः शश इति ख्यातः ॥ १६ ॥

Sloka 16.—When planets occupy their exaltation signs, or their own Rasis, possess strength and at the same time are in Kendra positions, five kinds of great men are ushered into the world who become widely known. According as Mars, Mercury, Jupiter, Venus and Saturn are placed in such a position, the Yogas are termed Ruchaka, Bhadra, Hamsa, Malavya and Sasa.

योगा अमी न युक्ता यद्यन्यग्रहभवैर्बहुलयोगैः ।
उत्तमकुलजातानां नृणां सम्यक् पृथक् फलं दद्युः ॥१७॥

Sloka 17.—When these Yogas are not considered along with the Yogas caused by the other planets, they give their effects fully and separately to the several men born of high families.

नित्यं धनैश्वर्ययुताः प्रसिद्धास्तेजास्विनः पुण्ययुता नरेन्द्राः ।
गजाश्वभाजो बहुरत्नपूर्णा दीर्घायुषस्ते पुरुषा भवन्ति ॥१८॥

Sloka 18.—These men always command riches; they are of world-wide fame, are very powerful, coupled with moral merit, endowed with elephants, horses and various precious jewels; they are long-lived.

बलरहितेन्दुरविभ्यां युक्तैर्भौमादिभिर्ग्रहैः पुरुषाः ।
न भवन्ति भूमिपाला दशासु तेषां सुतार्थसंयुक्ताः ॥१९॥

Sloka 19.—These men with the five planets beginning with Mars, and with the two luminaries weak, do not become kings during their Dasas, but are only blessed with children and wealth.

उत्तमयोगे जाता ये तेषां जीवनं सुखार्थयुतम् ।
विपरीते विपरीतं त्वित्याह ब्रह्मशौण्डाख्यः ॥२०॥

Sloka 20—People born in good Yogas live with all comfort and command all kinds of riches. When the yogas are adverse, they become likewise miserable. So says Brahma Sounda.

तुङ्गाद्भ्रष्टस्य दशा सर्वारम्भेषु निष्फलं कुरुते ।
होराधिपारिभवने भ्रष्टदशा मृत्युमावहति ॥२१॥

Sloka 21.—The Dasa of a planet fallen from his exaltation makes all enterprises begun under it fruitless. The Dasa of the planet owning the 6th (or the 8th) house reckoned from the lord of Lagna will indicate death if the said planet has fallen from exaltation.

In the 2nd line होराधिपाष्टभवने is another reading.

षष्ठाष्टमस्थोऽशुभदस्तु रौद्रो द्विषा शुभस्थानगतेन दृष्टः ।
स्वस्यां दशायां स करोति मृत्युं व्याध्यध्वतापादिपरिक्षयं वा ॥२२

Sloka 22.—When an inauspicious planet occupies the 6th or the 8th house, or is aspected by an inimical planet posited in a benefic house he will bring about in his Dasa period the demise of the native through disease, or weariness in travelling, etc.

व्योमाम्बुवाय्वग्निमहीस्वभावा जीवासुरेज्यार्किमहीजसौम्याः ।
छाया मरुत्पित्तकफानुरूपां मिश्रैस्तु मिश्रा बलिभिर्नृपस्य ॥२३

Sloka 23.—Jupiter, Saturn, Venus, Mars and Mercury during their Dasas exhibit their respective characteristics

due to the elements Ether, Water, Air Fire and Earth respectively through wind, bile and phlegm. If the planets be of a mixed nature (so far as their position in the horoscope is concerned), the effects also will be mixed.

छाया शुभा शुभफलानि निवेदयन्ती
लक्ष्या मनुष्यपशुपाक्षिषु लक्षणज्ञैः ।
तेजोगुणान् बहिरपि प्रविकासयन्ती
दीपप्रभास्फटिकरत्नघटस्थितेव ॥२४॥

Sloka 24.—The bodily lustre (complexion) which indicates both good and bad effects and reveals the virtues of the heart, as does the flame of a lamp kept inside a crystal pot, the qualities of brilliance, may be observed by those well-versed in the science, in men, animals and birds.

स्निग्धद्विजत्वङ्नखरोमकेशाच्छाया सुगन्धा च महीसमुत्था ।
तुष्ट्यर्थलाभाभ्युदयान् करोति धर्मस्य चाहन्यहानि प्रवृत्तिम् ॥२५॥

Sloka 25.—The lustre born of the element Earth, makes the teeth, skin, nails and hair on the body and head glossy, produces fine smell, bestows contentment, wealth, gain and rise in status, and causes engagement in religious and meritorious acts always.

स्निग्धा सिताच्छहारिता नयनाभिरामा
सौभाग्यमार्दवसुखाभ्युदयान् करोति ।
सर्वार्थसिद्धिजननी जननीव चाप्या
छाया फलं तनुभृतां शुभमादधाति ॥ २६ ॥

Sloka 26.—The lustre born of the element Water, is glossy, white or pure, green, attractive to the eyes, gives amiable qualities, a soft nature, happiness, prosperity, all

kinds of progress like a mother, and all-round good to human beings.

चण्डाधृष्या पद्महेमाग्निवर्णा युक्ता तेजोविक्रमैः सप्रतापैः ।
आग्नेयीति प्राणिनां स्याज्जयाय क्षिप्रं सिद्धिं वाञ्छितार्थस्य दत्ते ॥

Sloka 27.—The lustre born of the element, fire, is irascible, irresistible, of the hue of lotus, gold or fire, endowed with brilliance, valour and might; leads to victory of beings, and confers immediate accomplishment of the desired object.

आसितजलदकान्तिः पापगन्धोऽतिगूढो
मलिनपरुषकालः शोकसन्तापतप्तः ।
स भवति धनहीनः प्राक्तनार्थस्य हानि-
र्विचरति पवनोत्था यस्य कान्तिः शरीरे ॥ २८ ॥

Sloka 28.—The lustre born of the element, Air, is dark and is of the colour of the cloud, of foul smell, confounding, dusky, rough and leads to sorrows and suffering, without any wealth, and losing all ancestral property.

शब्दार्थविन्यासपरः प्रगल्भो विज्ञानयुक्तो महितस्वभावः ।
श्लथाङ्गसन्धिः कृशपाणिपादो व्योमप्रकृत्या पुरुषोऽतिदीर्घः ॥२९॥

Sloka 29.—The Lustre born of the element, Ether, will be a knower of words and their meanigs, will be an exponent in them, will be energetic, discerning, esteemed and revered by all, will have his joints loose, will have lean hands and feet, and at all body.

चिन्तास्वप्नानुभवे परिणमति फलं विहीनवीर्यस्य ।
पञ्चमहापुरुषोक्तच्छाया ह्येतानि योजयेदत्र ॥ ३० ॥

Sloka 30.—When planets are void of strength, the effects make themselves felt at least in dreamy reveries.

The effects of the पञ्चमहापुरुष yogas are to be dealt with similarly should the planets be weak.

आकृतिजातिप्रकृतीर्ज्ञात्वा सम्यक् फलं हि वक्तव्यम् ।
कुलदेशवयोऽनुगुणं दशाक्रमज्ञैर्यथान्यायम् ॥ ३१ ॥

इति श्रीवराहमिहिरसुतश्रीपृथुयशोविरचिते होरासारे सङ्कीर्णफलाध्यायः षोडशः॥

Sloka 31.—After knowing the form (stature, etc), caste, nature (disposition), etc, thoroughly, the effects should be predicted in conformity with the family, country and age of the person concerned, by people versed in the subject

Thus ends the 16th Adhyaya entitled "Miscellaneous effects" of the Dasas in the work Horasara composed by Sri Prithuyasas, the son of Sri: Varahamihira.

सप्तदशोऽध्यायः

अष्टवर्गस्य वाक्यानि सूर्यादीनां यथाक्रमम् ।

The following are the Ashtakavarga places in the several Ashtakavargas of the Sun and other planets:

रव्यष्टवर्गवाक्यानि—रविबिन्दुसंख्याः-समष्टिः—४८

Total Benefic dots—48.

रवेः—पुत्रवासोदधानस्य	....	1, 2, 4, 7, 8, 9, 10, 11
चन्द्रस्य—गोप्तानये	....	3, 6, 10, 11
कुजस्य—कौरवस्सदा धनिकः	....	1, 2, 4, 7, 8, 9, 10, 11
बुधस्य—गोमंतो धनपात्रं	....	3, 5, 6, 9, 10, 11, 12
गुरोः—शेषोधन्यः	....	5, 6, 9, 11
शुक्रस्य—तिथिश्रीः	....	6, 7, 12
शनेः—पुरवासो दधनिकः	....	1, 2, 4, 7, 8, 9, 10, 11
लग्नस्य—गौर्वित्तानापरः	....	3, 4, 6, 10, 11, 12

चन्द्राष्टवर्गवाक्यानि—चन्द्रबिन्दुसंख्याः-समष्टिः—४९

Total Benefic dots—49.

रवेः—गोप्तासाजनयः	....	3, 6, 7, 8, 10, 11
चन्द्रस्य—पण्डितसूनुर्यः	....	1, 3, 6, 7, 10, 11
कुजस्य—त्रिगुणेषु धनाय	....	2, 3, 5, 6, 9, 10, 11
बुधस्य—योगॉ वसुजनस्य	....	1, 3, 4, 5, 7, 8, 10, 11
गुरोः—पुंत्रासा जनोयत्र	....	1, 4, 7, 8, 10, 11, 12
शुक्रस्य—छत्रगस्साधुं निरं	....	3, 4, 5, 7, 9, 10, 11
शनेः—गुणस्तैस्थं	....	3, 5, 6, 11
लग्नस्य—गतिज्ञेयः	....	3, 6, 10, 11

कुजाष्टवर्गवाक्यानि—कुजबिन्दुसंख्याः—समष्टिः—३९

Total Benefic dots 39.

रवेः—बाणतनयः	....	3, 5, 6, 10, 11
चन्द्रस्य—गुप्तायः	....	3, 6, 11
कुजस्य—पात्रवसादनिकः	....	1, 2, 4, 7, 8, 10, 11
बुधस्य—गोशतयः	....	3, 5, 6, 11
गुरो—तनयश्रीः	....	6, 10, 11, 12
शुक्रस्य—तेजपरः	....	6, 8, 11, 12,
शनेः—कविसाद्धनिकः	....	1, 4, 7, 8, 9, 10, 11
लग्नस्य—कालस्तु नित्यः	....	1, 3, 6, 10, 11

बुधाष्टवर्गवाक्यानि—बुधबिन्दुसंख्याः—समष्टिः—५४

Total Benefic dots 54

रवेः—शीक्षाधन्यं श्रीः	....	5, 6, 9, 11, 12
चन्द्रस्य—रभस्तुदानस्य	....	2, 4, 6, 8, 10, 11
कुजस्य—पौरवस्सदा धनिकः	....	1, 2, 4, 7, 8, 9, 10, 11
बुधस्य—योगमतो धनपात्रं	....	1, 3, 5, 6, 9, 10, 11, 12
गुरोः—तद्पात्रं	....	6, 8, 11, 12
शुक्रस्य—पुत्रगर्भोमदाधन्यः	....	1, 2, 3, 4, 5, 8, 9, 11
शनेः—पुरवासोदाधनिकः	....	1, 2, 4, 7, 8, 9, 10, 11
लग्नस्य—कौरवस्तदानस्य	....	1, 2, 4, 6, 8, 10, 11

गुर्वष्टवर्गवाक्यानि—गुरुबिन्दुसंख्याः—समष्टिः—५६

Total Benefic dots 56

रवेः—यात्रालाभस्सदा धनिकः	....	1, 2, 3, 4, 7, 8, 9, 10, 11
चन्द्रस्य—प्रामसाधुस्यात्	....	2, 5, 7, 9, 11
कुजस्य—पुरतासोऽनिकः	....	1, 2, 4, 7, 8, 10, 11
बुधस्य—ररवश्शतधानित्यं	....	1, 2, 4, 5, 6, 9, 10, 11
गुरोः—पुत्रगर्भोसदानयः	....	1, 2, 3, 4, 7, 8, 10, 11
शुक्रस्य—श्रीमतो धनपः	....	2, 5, 6, 9, 10, 11
शनेः—गुणस्तत्र	....	3, 5, 6, 12
लग्नस्य—करिवशेषुसन्धिर्नया	....	1, 2, 4, 5, 6, 7, 9, 10, 11

शुक्राष्टवर्गवाक्यानि—शुक्रबिन्दुसंख्याः—समष्टिः—५२

Total Benefic dots—52

रवेः—हयश्रीः	....	8, 11, 12
चन्द्रस्य—पौरंगावोमदाधन्यत्र	....	1, 2, 3, 4, 5, 8, 9, 11, 12
कुजस्य—गुणेषु धन्यत्र	....	3, 5, 6, 9, 11, 12
बुधस्य—गुणेषु धन्यः	....	3, 5, 6, 9, 11
गुरोः—महीधनाढ्यः	....	5, 8, 9, 10, 11
शुक्रस्य—पुरगोभूमिहधनयः	....	1, 2, 3, 4, 5, 8, 9, 10, 11
शनेः—गर्भोमहाधनिकः	....	3, 4, 5, 8, 9, 10, 11
लग्नस्य—पौरंगावोमिदाधकः	...	1, 2, 3, 4, 5, 8, 9, 11

शन्यष्टवर्गवाक्यानि—शनिबिन्दुसंख्याः—समष्टिः—३९

Total Benefic dots—39

रवेः—कौरवस्सदानकिः	....	1, 2, 4, 7, 8, 10, 11
चन्द्रस्य—ल्तेयं	....	3, 6; 11
कुजस्य—लक्ष्मतिनयन्त्र	....	3, 5, 6, 10, 11, 12
बुधस्य—तेजोधनपात्रं	....	6, 8, 9, 10, 11, 12
गुरोः—शीतकरः	....	5, 6, 11, 12
शुक्रस्य—तस्यश्रीः	....	6, 11, 12
शनेः—गुणस्तर्कः	....	3, 5, 6, 11
लग्नस्य—योगद्वर्तिनार्यः	....	1, 3, 4, 6, 10, 11

॥ अथाष्टवर्गफलम् ॥

ग्रहप्रभृतिसंस्थानं निर्दिशेदक्षरैः क्रमात् ।
राशिचक्रं लिखेद्भूमौ संयोज्याक्षरसंख्यया ॥ १ ॥
शून्याक्षरेण दशमं निर्दिशेद्विधिवत्ततः ।
सूर्यादिसप्तपर्यन्तमेतैरंकैर्विनिक्षिपेत् ॥ २ ॥

Slokas 1-2—The several places reckoned from each of the several planets should be indicated by figures, the 10th one being represent by zero commencing with the Sun, etc., and ending with the Lagna in the several formulas, by writing on the ground the Rasi chakra.

स्वेषु स्वेष्वष्टवर्गेषु ग्रहाणां च पृथक् पृथक् ।
दशां द्वादशसंभिन्नां योजयेत्तत्र तत्र हि ॥ ३ ॥
ग्रहादिना फलं ज्ञात्वा निर्दिशेच्च पृथक् पृथक् ।

Slokas 3-3½—The 12 kinds of the Dasa periods arising for the 12 houses should be separately entered for each of the several planets, and their effects determined.

दशायां शून्यभावेषु शत्रुनीचगृहेषु च ॥ ४ ॥
व्याध्यर्थनाशदुःखादींल्लभते नात्र संशयः ।
एकद्वित्रिफलं राशौ धनधान्यपशुक्षयः ॥ ५ ॥
चत्वारि मध्यमानि स्युर्दशा तत्रैव मध्यमा ।
पञ्चमादिफलैर्युक्तं स्थानं स्यात्सर्वसिद्धिदम् ॥ ६ ॥

Slokas 4-6—In the case of houses containing no benefic dots—houses owned or occupied by inimical planets, houses which are depressed (*i. e.*, occupied by planets in depression)—the person will without fail suffer diseases, and untoward happenings. When there are 1, 2, or 3 benefic dots in a Rasi, there will be loss of wealth, corn or death of cattle. If there be four dots, the effects

will be medium, and the Dasa then will also be middling. If the dots be 5 or more, the effects arising from that house will all be auspicious

क्षेत्रोच्चोपचयस्थाने फलमेतदुदाहृतम् ।
पूर्वोक्तमार्गेण शुभमष्टवर्गं विनिर्दिशेत् ॥ ७ ॥

Sloka 7.—The effects should thus be predicted in the case of planets occupying their exaltation, own or Upachaya houses. The effects of benefic dots should be determined in the manner stated already.

शुभानि द्विगुणं कुर्युरन्यथा चान्यथा भवेत् ।
एवं द्वादशमूर्त्यादिस्थानेषु च दशाफलम् ॥ ८ ॥

Sloka 8.—The effects will be two-fold auspicious in good houses and two-fold bad, in bad houses. The extent of the effects in the 12 Bhavas beginning from the Lagna should be judged in this manner.

मूर्तेः शरीरसम्पत्तिमङ्गोपाङ्गनिरूपणम् ।
सत्यं सौभाग्यवित्तं च द्वितीयस्थानतो विदुः ॥ ९ ॥
स्वरं सत्त्वं विक्रमं च भ्रातरं च तृतीयभात् ।
सुखं बन्धुर्गुणश्चैव मातृचिन्ता च तुर्यतः ॥ १० ॥
स्वभावो बुद्धिविस्तारः पुत्रस्थानं तु पञ्चमम् ।
ज्ञातिशत्रुक्षतादीनि षष्ठेन विचिन्तयेत् ॥ ११ ॥
प्रसवं दारसौभाग्यं सप्तमस्थानतो विदुः ।
आधिव्याधि मृतीर्नाशमष्टमं परिचक्षते ॥ १२ ॥
भाग्यस्थानं गुरुस्थानं धर्मस्थानं ततः परम् ।
कर्माजीवस्तु दशमो प्रतापः पौरुषं श्रुतिः ॥ १३ ॥
कीर्तिश्च ज्ञायते तत्र दृष्टादृष्टनिरूपणम् ।
ऐश्वर्यमर्थलाभं च विदुरेकादशाद्गृहात् ॥ १४ ॥

द्वादशं तु व्ययस्थानं पापस्थानं प्रचक्षते ।
एवं द्वादशभावेषु चिन्तयेन्मातिमान्नरः ॥ १५ ॥

Slokas 9-15.—One's bodily growth or otherwise should be examined from the Lagna. Truthfulness, luck and wealth from the 2nd house. Voice, energy, valour and brothers, from the 3rd house; happiness, relations, qualities and mother should be determined through the 4th; one's nature, intelligence and children, from the 5th; one's Dayadis, enemies, wounds, etc, from the 6th; progeny, marital gains, diseases, death and destruction, are to be declared from the 8th; about fortune, elders and virtue, from the 9th; occupation and living, from the 10th; it is from this house that one has to seek for information about one's valour, prowess, learning and fame; all—seen and heard—about him should also be ascertained from this house. The 12th is called the house of expenditure. It is also called the house of sin It is in this manner that an intelligent astrologer should examine the twelve houses.

पापान्वितास्तु ये भावास्ते भावाः स्युर्विनाशिनः ।
सौम्याः सिद्धिकरा ज्ञेया मिश्रा मिश्रफलप्रदाः ॥१६॥

Sloka 16 – Houses occupied by malefics produce unfavourable effects; while if by benefics, they give good results. The effects will be medium, when the planets also are of medium nature.

मित्रोच्चभवनस्थश्चेत्पापः शुभफलं दिशेत् ।
अरातिनीचभस्थश्चेच्छुभः पापफलं दिशेत् ॥१७॥

Sloka 17.—If a planet occupy a friendly or exaltation house he will, though malefic, produce good effects. If he should be in his depression or inimical house he will, even if benefic, will give bad results.

एवमादिफलैः साद्धं दशाफलमुदीरयेत् ।
आत्मप्रभावशक्तिश्च पितृचिन्ता रवेः फलम् ॥१८॥

Sloka 18.—It is only after examining these, the astrologer should predict the effects of the planet's Dasa. Anything about one's own self, influence, and vigour should be divined through the Sun.

मनो बुद्धिप्रसादश्च मातृचिन्ता तु चन्द्रतः ।
भ्रातृसत्त्वगुणान् भूमिं भौमेन तु विचिन्तयेत् ॥१९॥

Sloka 19.—It is the Moon that determines the character of one's mind, royal favour and mother. It is through Mars that a person can ascertain his own courage, characteristic qualities, and lands.

प्रज्ञावाक्कर्मविज्ञानं बुधेनैव विनिर्दिशेत् ।
गुरुणा देहपुष्टिं च बुद्धिपुत्रार्थसम्पदः ॥२०॥

Sloka 20.—It is Mercury that influences one's speech, action and discrimination. One ought to conjecture about one's physical development, genius, sons and wealth through Jupiter.

शुक्राद्विवाहकर्म स्याद्भोगस्थानं च वाहनम् ।
आयुश्च जीवनोपायो मरणं च शनैश्चरात् ॥२१॥

Sloka 21.—Information regarding one's marriage, love affairs and vehicles is to be sought through Venus. It is Saturn that settles a person's period of life, livelihood and death.

बलहीना ग्रहा ये स्युर्जन्मकाले सदा नृणाम् ।
तेषामुक्तं फलं हीनं विपरीतं शनेः स्मृतम् ॥२२॥

Sloka 22.—Where planets are weak at one's birth, their effects also will be weak; the reverse will be the case with regard to Saturn.

स्वेषु स्वेष्वष्टवर्गेषु ग्रहोक्तफलमादिशेत् ।
अष्टवर्गादृते नैव दशाज्ञानं भवेत् ध्रुवम् ॥२३॥

Sloka 23.—All the planets reveal the r effects in proportion to the number of benefic dots in the houses occupied by them. Without the aid of Ashtakavarga, it will not be possible to determine the exact nature of the effects in the native's several Dasas.

आदित्याष्टकवर्गे च निक्षिप्याकाशचारिषु ।
अर्कस्थितस्य नवमो राशिः पितृगृहं स्मृतः ॥२४॥
तद्राशिफलसंख्याभिर्वर्धयेच्छोध्यपिण्डकम् ।
सप्तविंशतिसंभाज्यं शेषर्क्षे याति भानुजे ॥२५॥
तस्मिन् काले पितृक्लेशो भविष्यति न संशयः ।
तत्त्रिकोणगते वाऽपि पितुः पितृसमस्य वा ॥२६॥
मरणं तस्य जानीयाद्दशाच्छिद्रमुदीक्ष्य च ।

Sloka 24–26½.—Find out the benefic dots revealed by the planets in the Sun's Ashtakavarga (of the native). The Rasi that is ninth from that occupied by the Sun is said to denote the house of his father; The शोध्यपिण्ड (*Vide* Sloka 36 *infra*) figure should be multiplied by the number of benefic dots in the house of the 'father'. The product should be divided by 27. When Saturn in his transit passes through the particular star revealed by the remainder, the demise of the father will surely happen. Or when Saturn transits a star triangular to the previous one, the father or a relative similarly placed will die Thus should the astrologer declare, after due verification, if the Dasa at the time be a छिद्र one.

चन्द्रलग्नाद् गुरुस्थानं याते सूर्यसुते सति ॥२७॥

पित्रोर्नाशस्तत्र काले वक्ष्यते चार्कचन्द्रयोः ।
दशानुकूलकाले तु योजयेत्कालवित्तमः ॥२८॥

Sloka 27-28.—When Saturn transits the 9th house reckoned from the Moon, the demise of the parents may be predicted at the time should the Dasas of the two luminaries be also in progress.

लग्नात्सुखेश्वरांशेशदशायां च पितृक्षयः ।
सुखनाथदशायां वा पितृनाशस्त्वसंशयः ॥२९॥

Sloka 29.—The demise of the father may also occur during the Dasa of the planet owning the Navamsa of the lord of the 4th house. Or, it may happen without doubt during the Dasa of the lord of the 4th house.

पितृजन्माष्टमे जातस्तदीशो लग्नगोऽपि वा ।
तेनैव पितृकार्याणि कारयेन्नान्यथा यतः ॥३०॥

Sloka 30.—Find out the owner of the 8th house reckoned from the 9th. When this or the planet occupying the Lagna has his Dasa in progress, the father's obsequies have to be performed and not at any other time.

शुभेशे लाभलग्नस्थे चन्द्रलग्नाद्विशेषतः ।
मित्रग्रहसमायुक्ते माता पितृवशानुगा ॥३१॥

Sloka 31.—When the lord of the 9th house occupies the 11th or the Lagna—especially when the counting is reckoned from the place occupied by the Moon—and is in conjunction with a friendly planet, the mother also follows the fate of the father.

तेनैव पितृकार्येषु कर्मशेषं समापयेत् ।
पितृजन्मतृतीयर्क्षे जातः पितृधनाश्रितः ॥३२॥

Sloka 32.—With that, the native should finish the parental rites that still remain. One born in the 3rd house of the father will inherit money from the father.

पितृकर्मगृहे जातः पितृतुल्यगुणान्वितः ।
तदीशे लग्नसंस्थेऽपि पितृश्रेष्ठो भवेत्सुतः ॥३३॥

Sloka 33.—One born in a Rasi which is the 10th from that of his father will have characteristic qualities similar to those of his father Even if the lord of that Rasi occupy the Lagna, he will excel his father in merit.

सूर्याष्टवर्गे यद्राशौ फलं शून्यं प्रजायते ।
विवाहव्यवहारादि तन्मासे वर्जयेत्सदा ॥३४॥

Sloka 34.—In the Ashtakavarga of the Sun when there is a Rasi devoid of dots, one should always avoid that month for purposes of marriage and similar topics.

कलहायासदुःखानि शून्यमासि च सन्ति हि ।
एवमादिफलं ज्ञात्वा मासं प्रतिसमाचरेत् ॥ ३५ ॥

Sloka 35.—For, in a month void of benefic dots there may arise quarrels, weariness and misery; after knowing all these, one should prepare himself to meet the tide of events in that month.

संशोध्य पिण्डं सूर्यस्य रन्ध्रमानेन वर्धयेत् ।
हृतात् द्वादशभिः शेषं मेषादिगणयेत्पुनः ॥ ३६ ॥
तस्मिन्मासे मृतिं विद्यात्तत्त्रिकोणर्क्षकेऽपि वा ।

Slokas 36, 36½.—The शोध्यपिण्ड figures in the Ashtakavarga of the Sun should be multiplied by the number of benefic dots in the 8th house and divided by 12. In the month signified by the remainder when counted from Mesha, or in its triangular Rasi, one's demise may be expected.

चन्द्राष्टवर्गे निक्षिप्य शून्यफलगते विधौ ॥ ३७ ॥
तन्नक्षत्रं परित्यज्य शुभकार्याणि कारयेत् ।

Sloka 37-37½.—When the Moon transits a Rasi void of benefic dots in the Ashtakavarga of the Moon, one should shun that asterism for celebrating all auspicious events.

चन्द्राष्टमे च नक्षत्रत्रितये च विशेषतः ॥ ३८ ॥
आयासव्याधिदुःखानि लभते नात्र संशयः

Slokas 38, 38½.—Note the asterism that is in the 8th house from that of the Moon. When the Moon in her transit arrives in that asterism or its triangular ones, one will invariably get worry, disease and misery.

चन्द्रात् सुखफलैः पिण्डं वर्धयेद्भैर्विभाजयेत् ॥ ३९ ॥
शेषमृक्षं शनौ याते मातृहानिं विनिर्दिशेत् ।
तत्त्रिकोणेषु वा केचिदाहुश्छिद्रदशासु च ॥ ४० ॥

Slokas 39-40.—Multiply the शोध्यपिण्ड figures by the number indicating the benefic dots in the 4th house from the Moon aud divide the product by 12. When Saturn transits the star indicated by the remainder, the demise of the mother should be expected. The same event, may also be declared to happen when the transit takes place over an asterism triangular to the same or if there be a छिद्र Dasa at the time.

चन्द्रलग्नात्सुखस्थाने युते रवितनूभुवा ।
दृष्टे वा तेन तत्स्थाने पूर्वाह्ने कालसङ्गमे ॥ ४१ ॥
मृत्युं वा दूरगमनं निर्दिशेत्कालचिन्तकः ।

Slokas 41,41½.—If Saturn occupy or aspect the 4th house reckoned from the Moon and the hour at the time before noon, one should declare the person's demise or a distant voyage.

चन्द्रात्सुखाष्टमेशांशात् त्रिकोणे दिवसाधिपे॥ ४२ ॥
मातुर्वियोगं तन्मासे निर्दिशेल्लग्नतः पितुः ।
पितृवन्मातृचिन्तायां फलं सर्वं प्रकल्पयेत् ॥ ४३ ॥

Slokas 42-43 —Note the lords of the 4th and 8th houses counted from the Moon, and the Navamsas occupied by them. When the Sun transits a Rasi triangular to the same, the demise of the mother may come to pass in that month. The above has to be determined from the father's Lagna Rasi. The events for the mother should be determined in the same way as for the father.

भौमाष्टवर्गे संचिन्त्या भ्रातृसंपत्तथैव च ।
भौमो बलविहीनश्चेद् धीप्रयासान्वितो भवेत् ॥ ४४ ॥

Sloka 44.—In a similar manner, a brother's riches, etc.., have to be ascertained through the Ashtakavarga of Mars. If Mars be weak, there will be great difficulty in acquiring knowledge.

बुधाष्टवर्गं संशोध्य शेषराशिगते शनौ ।
पुत्रमित्रविनाशादींल्लभते नात्र संशयः ॥ ४५ ॥

Sloka 45.—Similar reductions have to be made in the Ashtakavarga figures of Mercury. When Saturn transits the Rasi signified by the remainder, loss of issue, of friends and other untoward events will without doubt happen.

गुरोरष्टकवर्गे च सन्तानमपि कल्पयेत् ।
गुरोः फलानि यावन्ति सुतस्थाने स्थितानि च ॥ ४६ ॥
शत्रुनीचग्रहफलं त्यक्त्वा तावन्त आत्मजाः ।
गुरोः सुतगृहे येंऽशास्तावन्तस्तनयाः स्मृताः ॥ ४७ ॥
सुतभेशनवांशैर्वा समानांस्तनयान्वदेत् ।

Sloka 46-47½.—From the Ashtakavarga of Jupiter, it is possible to fix up the issue that one will have. Find the number of benefic dots in the 5th house from Jupiter in his Ashtakavarga. The dots given by planets occupying their inimical and depression houses should be left out. The remainder will denote the number of issue. Note the Navamsa of the 5th house from Jupiter ; its order from Mesha will signify the number required ; or it may also be determined through the Navamsa (its order from Mesha) occupied by the lord of the 5th house.

गुरोरष्टकवर्गे च शोध्यशेषफलेषु वै ॥ ४८ ॥
क्रूराश्रितफलं त्यक्त्वा शेषास्तस्यात्मजाः स्मृताः ।
व्ययाष्टमसुतस्थैश्च पापैः क्षीणा हि सन्ततिः ॥ ४९ ॥

Slokas 48-49.—In the Ashtakavarga of Jupiter, find the total number of dots after reduction. The dots contained in the several Rasis occupied by malefics should be left out The remainder will signify the number of the issue. Of these, the dots in the 12th, 8th and the 5th if occupied by malefics, will denote the number that die very early.

गुरोरष्टकवर्गे चेत्सुतराशौ फलत्रयम् ।
अल्पात्मजः स विज्ञेयो गुरोः पश्चमभेऽपि वा ॥ ५० ॥
तदीशयुक्तदृष्टे वा तदा पुत्रान्समादिशेत् ।

Slokas 50-50½.—In the Ashtakavarga of Jupiter, if there be 3 benefic dots in the 5th house, or in the Rasi which is 5th from Jupiter, the person concerned should be declared as issueless. But if the said house be occupied or aspected by its lord, the person will beget issue.

एतैर्बहुप्रकारैस्तु कल्पयेत्कालवित्तमः ॥ ५१ ॥

सर्वलक्षणसंयोगे तदा तस्मिन् समादिशेत् ।
वंशक्षयादियोगा हि वक्ष्यन्तेऽग्रे मयास्फुटम् ॥ ५२ ॥
पूर्वोक्तलक्षणेनैव वंशलक्ष्म समादिशेत् ।

Slokas 51–52½.—It is by these and other various methods that the astrologer should solve the question. When the Yoga for progeny is clear, children will surely be born to the native. The Yogas for family-extinction will be described separately in a clear manner.

भृगोरष्टकवर्गं च निक्षिप्याकाशचारिषु ॥ ५३ ॥
त्रिकोणशोधनं कुर्यात्पश्चादेकाधिपत्यजम् ।
येषु भेषु फलानि स्युर्विशेषेण च तेषु च ॥ ५४ ॥
भूमिं कलत्रं वित्तं च कालविन्निर्दिशेन्नृणाम् ।
शुक्राज्जामित्रतो लब्धिं दाराणां निर्दिशेद् बुधः ॥ ५५ ॥

Slokas 53-55.—The number of benefic dots derived from the planets should be set up constituting the Ashtakavarga of Venus. The Trikona reduction should be effected, followed by the Ekadhipatya one. Whichever Rasis contain dots. the astrologer should declare lands, wife and wealth in proportion to their number. The number of dots contained in the 7th house reckoned from Venus will reveal the number of wives that one will have.

दाराधिपांशपक्षेत्रं दारजन्मर्क्षभं विदुः ।
तस्योच्चे निजराशौ वा केचिदिच्छन्ति तद्विदः ॥ ५६ ॥
तस्यांशकत्रिकोणे वा भार्याजन्मर्क्षभं वदेत् ।
लग्नेन्द्वोर्भाग्यभं जन्म वदन्ति मुनिसत्तमाः ॥ ५७ ॥
उक्तप्रकारमार्गेण भार्याया जन्मलग्नभम् ः
तयोः समागमर्क्षं च कल्पयेदत्र बुद्धिमान् ॥ ५८ ॥

Slokas 56-58.—Note where the lord of the Navamsa occupied by the owner of the 7th house is posited. This Rasi will be the Janma Rasi of the wife. Some say that the planet's exaltation or Swakshetra may also denote the same. The wife's Janma Rasi may also be any one of the triangular houses with regard to that Navamsa. Some Sages declare that it is the 9th house counted from the Lagna or the Moon. A clever astrologer should guess the most suitable and probable one.

अनुक्तराशिजन्मर्क्षमस्ति चेन्नास्ति सन्ततिः ।
भाग्यदारेशयुक्तर्क्षफलसंख्याः स्त्रियो विदुः ॥ ५९ ॥
क्षेत्रे त्रिगुणना तुल्या नवांशे द्विगुणास्तथा ।

Slokas 59, 59½.—If the Janma Rasi of the wife be some other than that what has been mentioned above, it means there will be no progeny. The (number of) benefic dots in the houses occupied by the lords of the 9th and 7th houses represent the number of females one will have. The number will be treble in the case of Rasis and double in that of the Navamsa when these happen to own them.

मन्दांशे मन्दसंयुक्ते मन्दक्षेत्रगते भृगौ ॥ ६० ॥
नीचांशे पापयुक्ते वा नीचस्त्रीभोगमृच्छति ।
भौमांशकगते शुक्रे भौमक्षेत्रगतेऽथवा ॥ ६१ ॥
भौमेन दृष्टे युक्ते वा परस्त्रीभोगमिच्छति ।

Slokas 60-61½.—When Venus occupies a Navamsa of Saturn, is conjoined with Saturn or occupies a Rasi of Saturn, or is in a depression Navamsa, or is associated with a malefic, the person concerned will have sexual intercourse with a low woman. When Venus occupies a Navamsa or Rasi owned by Mars, or is associated with or

aspected by Mars, the person concerned will desire to have sexual intercourse with a woman other than his wife.

जामित्रे मन्दभौमांशे तदीशे मन्दकामगे ॥ ६२ ॥
वेश्या वा जारिणी वाऽपि तस्य भार्या न संशयः ।

Slokas 62, $62\frac{1}{2}$.—When the 7th Bhava is in a Navamsa belonging to Saturn or Mars and the lord of that Bhava occupies the 7th house reckoned from Saturn, the wife of the native will, without doubt, be a courtezan or an adulteress.

पापारूढांशगे चन्द्रे जामित्रे व्ययगेऽपि वा ॥ ६३ ॥
पापग्रहान्विते शुक्रे स्त्रीहेतोर्भ्रंशमावदेत् ।

Slokas 63, $62\frac{1}{2}$.—When the Moon occupies the 7th or the 12th house and is in a Navamsa owned by a malefic, and when Venus is associated with a malefic, the person concerned will suffer degradation through a woman (at the bottom).

शुक्रांशकसमाना स्त्री वर्णरूपगुणान्विता ॥ ६४ ॥
भाग्येशांशपतुल्या वा दारेशस्य गुणान्विता ।
तेषां बलाबलेनैव भार्याया लक्षणं वदेत् ॥ ६५ ॥
एवमादिफलं ज्ञात्वा निर्दिशेत शुक्रवर्गतः ।

Slokas 64-$65\frac{1}{2}$.—The woman-partner will have the colour, form and qualities similar to those of the Navamsa occupied by Venus; or of the Navamsa occupied by the lord of the 9th or the 7th Thus, after ascertaining the preponderance of the number of benefic dots in the Ashtakavarga of Venus, one should arrive at the proper conclusion.

शनैश्चराष्टवर्गे च निक्षिप्याकाशचारिषु ॥ ६६ ॥

लग्नप्रभृतिमन्दान्तं फलान्येकत्र योजयेत् ।
मन्दादिलग्नपर्यन्तं फलान्यन्यत्र योजयेत ॥ ६७ ॥
फलसंख्यासमानाब्दे व्याधिं दुःखं समादिशेत ।
तयोर्योगसमानाब्दं मृत्युवर्षं प्रचक्षते ॥ ६८ ॥

Slokas 66-68.—Prepare the Ashtakavarga of Saturn by finding the benefic dots contributed by the several planets. Add the dots in the houses between the Lagna and Saturn. Add also the dots between Saturn and the Lagna. In the years signified by the two totals, the person concerned will suffer diseases and misery. Add up the two totals. During the year denoted by this sum-total, the native may suffer death.

शोध्यसंशोधनं कृत्वा पिण्डं संस्थाप्य रन्ध्रगैः ।
फलैर्हत्वा भजेत्सप्तविंशत्यायुः फलं भवेत् ॥ ६९ ॥
शेषेण मासादिवसाघटिकाश्च प्रकल्पयेत् ।
दशाछिद्रसमे काले तस्मिन् मृत्युर्न संशयः ॥ ७० ॥

Slokas 69-70.—After doing the two reductions enjoined, make up the शोध्यपिण्ड. Multiply this by the dots in the 8th house and divide the product by 27. The quotient will reveal the Ayus of the native. From the remainder, the months, days, ghatikas, etc may be computed. If at the time thus revealed, there be also दशाछिद्र, then death will surely hapen.

मन्दाष्टवर्गे राशौ तु फलहीने क्षयो भवेत् ।
तद्भक्ते भास्करेणेन्दौ तस्मिन् काले मृतिं वदेत् ॥ ७१ ॥

Sloka 71.—In the Ashtakavarga of Saturn, if there be no benefic dots in any Rasi, it indicates disease or death. When the शोध्यपिण्ड product (*Vide* Slokas 69-70) is divided by 12, and when the Moon transits the sign thus revealed, one may predict death.

सर्वग्रहान् फलयुतांश्च नियोज्य चक्रे
मूर्त्या च सर्वमशुभं च शुभं समं च ।
जन्मादितः फलमशेषदशां समीक्ष्य
यात्राविवाहसमये कथयेद्विधिज्ञः ॥ ७२ ॥

Sloka 72.—After entering all the planets in their several Ashtakavargas with their respective benefic dots and ascertaining from the Lagna all those houses that are unfavourable, auspicious and medium and their effects in the entire Dasa periods, the astrologer should proceed to fix up the time for travel, marriage etc.

रव्यादीनां समुदायाष्टवर्गवाक्यानि-बिन्दुसंख्याश्च ॥

3 3 3 3 2 3 4 5 3 5 7 2
रवेः— बालोबलिष्ठो लवणागमो सुरो
2 3 5 2 2 5 2 2 2 3 7 1
चन्द्रस्य— रागीमुरारि शिखरीन्द्रगाथया ।
4 5 3 5 2 3 4 4 4 6 7 2
कुजस्य— भौमोगणेन्द्रोलघुभावतासुरो
3 1 52 6 6 12 5 5 7 3
बुधस्य— गोकर्णरक्तातुपुराणमैथिली ॥ ७३ ॥
2 2 1 23 42424 7 3
गुरोः— रुद्रःपरंगह्वरभैरवस्थली
2 3 3 3 4 4 2 34 3 6 3
शुक्रस्य— रागीबलीभाखरगर्भिगाचलाः ।
3 2 4 4 4 3 3 4 44 6 1
शनेः— गिरौविवस्वान्बलवद्विवक्षया
5 3 5 52 6 1 2 2 6 7 1
